# Shri Ganesha Stuti Chandrakrita

# ચન્દ્રકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Chandrakrita

File name : gaNeshastutiHchandrakRRitA2.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM chaturthaH khaNDaH | adhyAyaH 6 | 4.6. 95-107||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 4, 2024

*sanskritdocuments.org*

# ચન્દ્રકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
ચન્દ્ર ઉવાચ ।
નમસ્તે વિઘ્નપાલાય ગણેશાય પરાત્મને ।
બ્રહ્મેશાય સ્વભક્તેભ્યો બ્રહ્મભૂયપ્રદાય તે ॥ ૯૫॥
અનામયાય સર્વાદિપૂજ્યાય તુ નમો નમઃ ।
શિવાત્મજાય દેવાય વિષ્ણુપુત્રાય તે નમઃ ॥ ૯૬॥
બ્રહ્મપુત્રાય સૂર્યસ્ય પુત્ર તે વિઘ્નહારિણે ।
શક્તિપુત્રાય શેષસ્ય પુત્રાય ચ નમો નમઃ ॥ ૯૭॥
સર્વપુત્રાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
સર્વેશાય પરેશાય પરાત્પરતરાય તે ॥ ૯૮॥
સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રચાલક ।
હેરમ્બાય મહેશાનાં મહેશાય નમો નમઃ ॥ ૯૯॥
સ્રષ્ટે પાત્રે ચ સંહર્ત્રે પરમાત્મસ્વરૂપિણે ।
સર્વેભ્યો વરદાત્રે તેઽનાદિસિદ્ધાય ભો નમઃ ॥ ૧૦૦॥
ક્ષમાપરાધં દેવેશ ત્વન્માયામોહધારિણઃ ।
શરણં તે પ્રસન્નસ્ય રક્ષ માં મહતો ભયાત્ ॥ ૧૦૧॥
માં દૃષ્ટ્વા હર્ષસમ્પન્ના અભવન્ દેવતાદયઃ ।
અધુના માં નિરીક્ષ્યૈવ દોષયુક્તા ભયાતુરાઃ ॥ ૧૦૨॥
અતો માં નૈવ પશ્યન્તિ પાપિનાં પાપરૂપિણમ્ ।
નિર્દોષં કુરુ વિઘ્નેશ કરુણાલય તે નમઃ ॥ ૧૦૩॥
સર્વદા દર્શનં તે વૈ મમાસ્તાં વિઘ્નવારણ ।
તેનાઽહં કૃતકૃત્યશ્ચ ભવેયં યોગિસમ્મતઃ ॥ ૧૦૪॥
તતોઽતિભક્તિસંયુક્તં નૃત્યન્તં દેવસન્નિધૌ ।
રોમાઞ્ચાશ્રુસમાયુક્તં દૃષ્ટ્વા ઢુણ્ઢિર્જગાદ તમ્ ॥ ૧૦૫॥
(ફલશ્રુતિઃ)

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
અપરાધાનનન્તાંશ્ચ સહે તેઽનેન નિશ્ચિતમ્ ॥ ૧૦૬॥
સર્વસિદ્ધિપ્રદં પૂર્ણં ભવિષ્યતિ વિશેષતઃ ।
પઠતાં શ‍ૃણ્વતાં ચૈવ નાનાસુખકારકં ભવેત્ ॥ ૧૦૭॥

ઇતિ ચન્દ્રકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં ચતુર્થઃ ખણ્ડઃ । અધ્યાયઃ ૬ । ૪.૬। ૯૫-૧૦૭॥

- .. mudgalapurANaM chaturthaH khaNDaH . adhyAyaH 6 . 4.6. 95-107..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stuti Chandrakrita*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*